तारा” रङ्गना० । “रोहिण्यादित्यमूलानां प्राची सार्पस्य चैव हि । तथा प्रत्यक्शेषाणां स्थूला स्यात् योगतारका” सू०सि० रोहिणीपुनर्वसुमूलानामश्लेषायाश्च प्रत्येकं स्वतारासु पूर्व्वदिक्स्था तारा योगतारा । अवशिष्टानां आर्द्राचित्रास्वात्यभिजिच्छततारायाणां यथायोग्यं स्वतारासु यात्यन्तं स्थूला सा योगतारा नक्षत्रप्रसङ्गात् ब्रह्मादिनक्षत्राणामपि स्थितिस्थानमुक्तं तत्रैव । “पूर्व्वस्यां ब्रह्महृदयादंशकैः पञ्चभिः स्थितः । प्रजापतिर्वृषान्तेऽसौ सौम्येऽष्टत्रिंशदंशकैः” सू०सि० ब्रह्महृदयस्थानात् पूर्व्वभागे पञ्चभिरंशैः वृषान्तनिकटे एकराशिसप्तविंशत्यंशैः प्रजापतिस्तारात्मको ब्रह्मा क्रान्तिवृत्ते स्थितः । अस्य विक्षेपमाह असाविति । असौ ब्रह्मा सौम्ये उत्तरस्यां अष्टत्रिंशैः स्थित इत्यर्थः रङ्गना० । “अपांवत्सश्च चित्रायाउत्तरेऽंशैस्तु पञ्चभिः । बृहत् किञ्चिदतो भागैरापः षड्भिस्तथोत्तरे” सू०सि० । “तिष्यपुनर्वसू द्वन्द्वे पा०सू० व्याख्यायां सरलायामस्माभिर्यत् पुनर्वसोर्द्वितारत्वमुक्तं तन्मनोरमादिमूलतया प्रामादिकमेव । एतच्छास्त्रालोचनेन पुनर्वसुनक्षत्रस्य चतुस्तारात्मकत्वं पुष्यस्य त्रितारात्मकत्वं तेन बहुत्वे प्राप्ते द्वित्वविधायकं सूत्रं सार्थकमिति द्रष्टव्यम् ।‘पादः पुनर्व्वसोरन्त्यः पुष्योऽश्लेषा च कर्कट”। ज्योति० नक्षत्राधिपा उक्ताः बृहत्सं० । “अश्वियमदहनकमलजशशिशूलभृददितिजीवफणिपितरः । योन्यर्य्यमदिनकृत्त्वष्टृपवनशक्राग्निमित्राः । शक्रोनिर्ऋतिस्तोयं विश्वविरिञ्ची हरिर्वसुः वरुणः । अजपादोऽहिर्बुध्नः पूषा चेतीश्वरा भानाम्” । “चित्राश्लेषास्वातिविशाखा भरणीपित्र्यशक्रकृत्तिकाः । नातिशस्ताः प्रयाणेषु” ज्यो०त० अस्य क्लीवत्वमपि ‘अश्लेषर्क्षद्वयमपित्र्यविशाखयुक्तं पूर्व्वात्रयं शतभिषा च नवाप्यूडूनि” एतान्यधोमुखगणानि कथितानि नित्यं विद्यार्थभूमिखननेषु च भूषितानि” ज्यो०त० । तथा च नक्षत्रपरत्वे न० तारापरत्वे स्त्रीत्वम् । एवं मूलाश्रवणादीनामपि द्विलिङ्गत्वम् । इयं तीक्ष्णगणः “तीक्ष्णोऽहिरुद्रेन्द्रयुक्” ज्यो०त० नास्ति श्लेषो यस्य । २असंबन्धे त्रि० । श्लेषः काव्ये नानार्थपरता स नास्ति यत्र । ३श्लेषशून्ये काव्ये न० ।

**अश्लेषाज** पु० अश्लेषानक्षत्रे जायते जन–ड ईत० । केतुग्रहे तस्याश्लेषाजातत्वात्तथात्वं अश्लेषाजातादयोऽप्यत्र ।

**अश्लेषाशान्ति** स्त्री अश्लेषाजननिमित्ता शान्तिः शाक०त० । अश्लेषाजननिमित्तशान्तौ । तत्र अश्लेषाजनने दोषमाह” ज्यो०त० । “अश्विनीमघमूलानां गण्डाआद्यास्त्रिनाड़िकाः । अन्त्याः पौष्णोरगेन्द्राणां पञ्चैव यवनाः जगुः” मूलेन्द्रयोर्दिवा गण्डोनिशा च पितृसर्पयोः । सन्ध्याद्वये तथा ज्ञेये रेवतीतुरगर्क्षयोः” सन्ध्यारात्रिदिवाभागे गण्डयोगोद्भवः शिशुः । आत्मानं मातरं तातं वित्तं हन्ति यथाक्रमम् । सर्वेषां गण्डजातानां परित्यागो विधीयते । तातेनादर्शनं वापि यावत् षाण्मासिको भवेत्” ज्यो०त० । त्यागासामर्थ्ये षण्मासपर्य्यन्तं मुखं न पश्येत् शान्त्या सर्वत्र शुभम् । त्रिपञ्चादिघटिकोक्तिर्दोषबाहुल्यार्था वस्तुतः सर्वचरणेष्वेव दोषविशेषः यथाह नारदः । “आद्ये पिता नाशमुपैति मूलपादे द्वितीये जननी तृतीये । धनं चतुर्थेऽस्य शुभोऽस्य शान्त्या सर्वत्र तत्स्यादहिभे विलोमम्” । सन्ध्यादिविशेषोक्तिरधिकदोषार्था । यथाह ज्योतिर्निबन्धः । ‘मूलाश्विपित्र्यचरणे प्रथमे च नूनं पौष्णेन्द्रयोश्च फणिनश्च तुरीयपादे । मातुः पितुः स्ववपुषोश्च करोति नाशं जातो यदा निशिदिनेऽप्यथ सन्ध्ययोर्वा” । कन्यायां विशेषः विधानपारिजाते । “न बाला हन्ति मूलर्क्षे पितरं मातरं तथा । मूलजा श्वशुरं हन्ति व्यालजा च तदङ्गनाम् । महेन्द्रजाऽग्रजं हन्ति देवरन्तु द्विदेवजा । शान्तिर्वा पुष्कलास्याच्चेत्तर्हि दोषो न कश्चन” । द्विदेवजा अश्विनीजाता तस्याः अश्विनीसुतदेवताकत्वेन तयोश्च द्वित्वात् तथात्वम् । तच्छान्तिश्च“अश्लेषायान्तु जातानां शान्तिं वक्ष्याम्यतः परम् जातस्य द्वादशाहे च शान्तिहोमं समाचरेत् । विभवे पञ्च कुम्भांस्तु द्वयं वा तदशक्तितः”इत्यादिना मानवसंहितोक्ता । सा च विधानपारिजाते अश्लेषाशान्तिविधानप्रकरणे दृश्या । तत्फलं च मन्त्रलिङ्गात् ज्ञेयम् मन्त्रो यथा । “अश्लेषार्क्षजातस्य मातापित्रोर्धनस्य च । भ्रातृज्ञातिकुलस्थानां दोषं सर्वं व्यपोहतु । योऽसौ वागीश्वरो देवो ह्यधिदेवो बृहस्पतिः । मातापित्रोः शिशोश्चैव गण्डदोषं व्यपोहतु । पितरं सर्वभूतानां रक्षन्तु पितरः सदा । सर्पनक्षत्रजातस्य वित्तं ज्ञातिं च बान्धवान्” वि०पा० पुरा० ।

**अश्व** पु० अश्नुते व्याप्नोति मार्गम् अश–क्वन् । घोटके “गच्छन्त मुच्चलितचामरचारुमश्वम्” माघः । “जितसिंहभयानागा यत्राश्वा बिलयोनयः” कुमा० । “अमृताद्वाष्पतोवह्नेर्वेदेभ्योऽण्डाच्च गर्भतः । साम्नो हयानामुत्पत्तिः सप्तधा परिकीर्त्तिताः इत्युक्तेस्तेषाममृताद्युत्पत्तिस्थानम् ।